# Rudraprashna

# રુદ્રપ્રશ્નઃ

## Document Information

Text title : rudraprashnaH svara sahitam

File name : rudra.itx

Category : veda, svara, shiva

Location : doc_veda

Author : Vedic Tradition

Transliterated by : Rajagopal Iyer, Rekha Venkatesh

Proofread by : Rajagopal Iyer, Rekha Venkatesh

Description-comments : Mantrapushpam

Latest update : June 14, 2000, October 29, 2010, March 19, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 17, 2022

*sanskritdocuments.org*

# રુદ્રપ્રશ્નઃ

## ॥ લઘુન્યાસઃ ॥

ૐ અથાત્માનꣳ શિવાત્માનꣳ શ્રીરુદ્રરૂપં ધ્યાયેત્ ॥
શુદ્ધસ્ફટિકસંકાશં ત્રિનેત્રં પઞ્ચવક્ત્રકમ્ ।
ગઙ્ગાધરં દશભુજં સર્વાભરણભૂષિતમ્ ॥

નીલગ્રીવં શશાઙ્કાઙ્કં નાગયજ્ઞોપવીતિનમ્ ।
વ્યાઘ્રચર્મોત્તરીયં ચ વરેણ્યમભયપ્રદમ્ ॥

કમણ્ડલ્વક્ષસૂત્રાણાં ધારિણં શૂલપાણિનમ્ ।
જ્વલન્તં પિઙ્ગલજટા-શિખામુદ્યોતધારિણમ્ ॥

વૃષસ્કન્ધ-સમારૂઢમ્ ઉમાદેહાર્ધ-ધારિણમ્ ।
અમૃતેનાપ્લુતં શાન્તં દિવ્યભોગસમન્વિતમ્ ॥

દિગ્દેવતાસમાયુક્તં સુરાસુરનમસ્કૃતમ્ ।
નિત્યં ચ શાશ્વતં શુદ્ધં ધ્રુવમક્ષરમવ્યયમ્ ॥

સર્વવ્યાપિનમીશાનં રુદ્રં વૈ વિશ્વરૂપિણમ્ ।
એવં ધ્યાત્વા દ્વિજસમ્યક્ તતો યજનમારભેત્ ॥
ૐ પ્રજનને બ્રહ્મા તિષ્ઠતુ । પાદયોર્વિષ્ણુસ્તિષ્ઠતુ ।
હસ્તયોર્હરસ્તિષ્ઠતુ । બાહ્વોરિન્દ્રસ્તિષ્ઠતુ । જઠરેઽગ્નિસ્તિષ્ઠતુ ।
હૃદયે શિવસ્તિષ્ઠતુ । કણ્ઠે વસવસ્તિષ્ઠન્તુ । વક્ત્રે સરસ્વતી
તિષ્ઠતુ । નાસિકયોર્વાયુસ્તિષ્ઠતુ । નયનયોશ્ચન્દ્રાદિત્યૌ
તિષ્ઠેતામ્ । કર્ણયોરશ્વિનૌ તિષ્ઠેતામ્ । લલાટે રુદ્રાસ્તિષ્ઠન્તુ ।
મૂર્ધ્ન્યાદિત્યાસ્તિષ્ઠન્તુ । શિરસિ મહાદેવસ્તિષ્ઠતુ । શિખાયાં
વામદેવસ્તિષ્ઠતુ । પૃષ્ઠે પિનાકી તિષ્ઠતુ । પુરતઃ શૂલી તિષ્ઠતુ ।
પાર્શ્વયોઃ શિવાશઙ્કરૌ તિષ્ઠેતામ્ । સર્વતો વાયુસ્તિષ્ઠતુ । તતો બહિઃ
સર્વતોઽગ્નિર્જ્વાલામાલા પરિવૃતસ્તિષ્ઠતુ । સર્વેષ્વઙ્ગેષુ સર્વા દેવતા

યથાસ્થાનં તિષ્ઠન્તુ । માꣳ રક્ષન્તુ । સર્વાન્ મહાજનાન્ રક્ષન્તુ ॥
ૐ અગ્નિર્મે વાચિ શ્રિતઃ । વાગ્ઘૃદયે । હૃદયં મયિ ।
અહમમૃતે । અમૃતં બ્રહ્મણિ । વાયુર્મે પ્રાણે શ્રિતઃ ।
પ્રાણો હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં
બ્રહ્મણિ । સૂર્યો મે ચક્ષુષિ શ્રિતઃ । ચક્ષુર્હૃદયે ।
હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ ।
ચન્દ્રમા મે મનસિ શ્રિતઃ । મનો હૃદયે । હૃદયં
મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । દિશો મે
શ્રોત્રે શ્રિતાઃ । શ્રોત્રꣳ હૃદયે । હૃદયં મયિ ।
અહમમૃતે । અમૃતં બ્રહ્મણિ । આપો મે રેતસિ શ્રિતાઃ ।
રેતો હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં
બ્રહ્મણિ । પૃથિવી મે શરીરે શ્રિતા । શરીરગ્ં હૃદયે ।
હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ ।
ઓષધિવનસ્પતયો મે લોમસુ શ્રિતાઃ । લોમાનિ
હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં
બ્રહ્મણિ । ઇન્દ્રો મે બલે શ્રિતઃ । બલꣳ હૃદયે ।
હૃદયં મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ ।
પર્જન્યો મે મૂર્ધ્નિ શ્રિતઃ । મૂર્ધા હૃદયે । હૃદયં
મયિ । અહમમૃતે । અમૃતં બ્રહ્મણિ । ઈશાનો મે મન્યૌ
શ્રિતઃ । મન્યુર્હૃદયે । હૃદયં મયિ । અહમમૃતે ।
અમૃતં બ્રહ્મણિ । આત્મા મ આત્મનિ શ્રિતઃ । આત્મા
હૃદયે । હૃદયં મયિ । અહમમૃતે । અમૃતં
બ્રહ્મણિ । પુનર્મ આત્મા પુનરાયુરાગાત્ । પુનઃ પ્રાણઃ
પુનરાકૂતમાગાત્ । વૈશ્વાનરો રશ્મિભિર્વાવૃધાનઃ ।
અન્તસ્તિષ્ઠત્વમૃતસ્ય ગોપાઃ ॥
અસ્ય શ્રી રુદ્રાધ્યાય પ્રશ્ન મહામન્ત્રસ્ય અઘોર ઋષિઃ, અનુષ્ટુપ્ છન્દઃ,
સઙ્કર્ષણમૂર્તિસ્વરૂપો યોઽસાવાદિત્યઃ પરમપુરુષઃ સ એષ રુદ્રો દેવતા ।
નમઃ શિવાયેતિ બીજમ્ । શિવતરાયેતિ શક્તિઃ । મહાદેવાયેતિ કીલકમ્ ।

શ્રી સામ્બસદાશિવ પ્રસાદ સિદ્ધ્યર્થે જપે વિનિયોગઃ ॥
ૐ અગ્નિહોત્રાત્મને અઙ્ગુષ્ઠાભ્યાં નમઃ ।
દર્શપૂર્ણમાસાત્મને તર્જનીભ્યાં નમઃ ।
ચાતુર્માસ્યાત્મને મધ્યમાભ્યાં નમઃ ।
નિરૂઢપશુબન્ધાત્મને અનામિકાભ્યાં નમઃ ।
જ્યોતિષ્ટોમાત્મને કનિષ્ઠિકાભ્યાં નમઃ ।
સર્વક્રત્વાત્મને કરતલકરપૃષ્ઠાભ્યાં નમઃ ॥

અગ્નિહોત્રાત્મને હૃદયાય નમઃ ।
દર્શપૂર્ણમાસાત્મને શિરસે સ્વાહા ।
ચાતુર્માસ્યાત્મને શિખાયૈ વષટ્ ।
નિરૂઢપશુબન્ધાત્મને કવચાય હુમ્ ।
જ્યોતિષ્ટોમાત્મને નેત્રત્રયાય વૌષટ્ ।
સર્વક્રત્વાત્મને અસ્ત્રાય ફટ્ ।
ભૂર્ભુવસ્સુવરોમિતિ દિગ્બન્ધઃ ॥

## ॥ ધ્યાનમ્ ॥

આપાતાળ-નભઃ સ્થલાન્ત-ભુવન-બ્રહ્માણ્ડ-માવિસ્ફુર-
જ્જ્યોતિઃ સ્ફાટિક-લિઙ્ગ-મૌળિ-વિલસત્પૂર્ણેન્દુ-વાન્તામૃતૈઃ ।
અસ્તોકાપ્લુત-મેક-મીશ-મનિશં રુદ્રાનુવાકાઞ્જપન્
ધ્યાયે-દીપ્સિત-સિદ્ધ્યે ધ્રુવપદં વિપ્રોઽભિષિઞ્ચે-ચ્છિવમ્ ॥
બ્રહ્માણ્ડવ્યાપ્તદેહા ભસિતહિમરુચા ભાસમાના ભુજઙ્ગૈઃ
કણ્ઠે કાલાઃ કપર્દાકલિત શશિકલા-શ્ચણ્ડકોદણ્ડ હસ્તાઃ ॥
ત્ર્યક્ષા રુદ્રાક્ષમાલાઃ પ્રકટિતવિભવાઃ શામ્ભવા મૂર્તિભેદા
રુદ્રાઃ શ્રીરુદ્રસૂક્ત-પ્રકટિતવિભવા નઃ પ્રયચ્છન્તુ સૌખ્યમ્ ॥

શ્રી ગુરુભ્યો નમઃ । હરિઃ ઓઉમ્ ।
ૐ ગણાનાં ત્વા ગણપતિઁ હવામહે
કવિં કવીનામુપમશ્રવસ્તમમ્ ।
જ્યેષ્ઠરાજં બ્રહ્મણાં બ્રહ્મણસ્પત
આ નઃ શૃણ્વન્નૂતિભિસ્સીદ સાદનમ્ ॥

॥ ૐ શ્રી મહાગણપતયે નમઃ ॥

ૐ શં ચ મે મયશ્ચ મે પ્રિયં ચ મેઽનુકામશ્ચ મે
કામશ્ચ મે સૌમનસશ્ચ મે ભદ્રં ચ મે શ્રેયશ્ચ મે
વસ્યશ્ચ મે યશશ્ચ મે ભગશ્ચ મે દ્રવિણં ચ મે
યન્તા ચ મે ધર્તા ચ મે ક્ષેમશ્ચ મે ધૃતિશ્ચ મે
વિશ્વં ચ મે મહશ્ચ મે સંવિચ્ચ મે જ્ઞાત્રં ચ મે
સૂશ્ચ મે પ્રસૂશ્ચ મે સીરં ચ મે લયશ્ચ મ ઋતં ચ
મેઽમૃતં ચ મેઽયક્ષ્મં ચ મેઽનામયચ્ચ મે જીવાતુશ્ચ મે
દીર્ઘાયુત્વં ચ મેઽનમિત્રં ચ મેઽભયં ચ મે સુગં ચ
મે શયનં ચ મે સૂષા ચ મે સુદિનં ચ મે ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

## ॥ શિવોપાસન મન્ત્રાઃ ॥

નિધનપતયે નમઃ । નિધનપતાન્તિકાય નમઃ । ઊર્ધ્વાય
નમઃ । ઊર્ધ્વલિઙ્ગાય નમઃ । હિરણ્યાય નમઃ । હિરણ્યલિઙ્ગાય
નમઃ । સુવર્ણાય નમઃ । સુવર્ણલિઙ્ગાય નમઃ । દિવ્યાય નમઃ ।
દિવ્યલિઙ્ગાય નમઃ । ભવાય નમઃ । ભવલિઙ્ગાય નમઃ । શર્વાય
નમઃ । શર્વલિઙ્ગાય નમઃ । શિવાય નમઃ । શિવલિઙ્ગાય નમઃ ।
જ્વલાય નમઃ । જ્વલલિઙ્ગાય નમઃ । આત્માય નમઃ । આત્મલિઙ્ગાય
નમઃ । પરમાય નમઃ । પરમલિઙ્ગાય નમઃ । એતથ્સોમસ્ય સૂર્યસ્ય
સર્વલિઙ્ગગ્ં સ્થાપયતિ પાણિમન્ત્રં પવિત્રમ્ ॥
સદ્યોજાતં પ્રપદ્યામિ સદ્યોજાતાય વૈ નમો નમઃ ।
ભવે ભવે નાતિભવે ભવસ્વ મામ્ । ભવોદ્ભવાય
નમઃ ॥ વામદેવાય નમો જ્યેષ્ઠાય નમશ્શ્રેષ્ઠાય
નમો રુદ્રાય નમઃ કાલાય નમઃ કલવિકરણાય નમો
બલવિકરણાય નમો બલાય નમો બલપ્રમથનાય
નમસ્સર્વભૂતદમનાય નમો મનોન્મનાય નમઃ ॥
અઘોરેભ્યોઽથ ઘોરેભ્યો ઘોરઘોરતરેભ્યઃ । સર્વેભ્યઃ

સર્વશર્વેભ્યો નમસ્તે અસ્તુ રુદ્રરૂપેભ્યઃ ॥ તત્પુરુષાય
વિદ્મહે મહાદેવાય ધીમહિ । તન્નો રુદ્રઃ પ્રચોદયાત્ ॥
ઈશાન-સ્સર્વવિદ્યાના-મીશ્વર-સ્સર્વ ભૂતાનાં
બ્રહ્માઽધિપતિર્બ્રહ્મણોઽધિપતિર્બ્રહ્મા શિવો મે અસ્તુ
સદાશિવોમ્ ॥
નમો હિરણ્યબાહવે હિરણ્યવર્ણાય હિરણ્યરૂપાય હિરણ્યપતયેઽમ્બિકાપતય
ઉમાપતયે પશુપતયે નમો નમઃ । ઋતꣳ સત્યં પરં બ્રહ્મ
પુરુષં કૃષ્ણપિઙ્ગલમ્ । ઊર્ધ્વરેતં વિરૂપાક્ષં
વિશ્વરૂપાય વૈ નમો નમઃ ॥ સર્વો વૈ રુદ્ર-સ્તસ્મૈ
રુદ્રાય નમો અસ્તુ । પુરુષો વૈ રુદ્ર-સ્સન્મહો નમો નમઃ ।
વિશ્વં ભૂતં ભુવનં ચિત્રં બહુધા જાતં જાયમાનં
ચ યત્ । સર્વો હ્યેષ રુદ્ર-સ્તસ્મૈ રુદ્રાય નમો અસ્તુ ।
કદ્રુદ્રાય પ્રચેતસે મીઢુષ્ટમાય તવ્યસે । વો ચેમ
શન્તમꣳ હૃદે । સર્વો હ્યેષ રુદ્ર-સ્તસ્મૈ રુદ્રાય
નમો અસ્તુ ॥

## ॥ શ્રી રુદ્રપ્રશ્નઃ (નમકમ્) ॥

ૐ નમો ભગવતે રુદ્રાય ॥
ૐ નમસ્તે રુદ્ર મન્યવ ઉતોત ઇષવે નમઃ । નમસ્તે અસ્તુ
ધન્વને બાહુભ્યામુત તે નમઃ । યા ત ઇષુઃ શિવતમા
શિવં બભૂવ તે ધનુઃ । શિવા શરવ્યા યા તવ તયા
નો રુદ્ર મૃડય । યા તે રુદ્ર શિવા તનૂરઘોરાઽપાપકાશિની ।
તયા નસ્તનુવા શન્તમયા ગિરિશન્તાભિચાકશીહિ ।
યામિષું ગિરિશન્ત હસ્તે બિભર્ષ્યસ્તવે । શિવાં ગિરિત્ર
તાં કુરુ મા હિꣳસીઃ પુરુષં જગત્ । શિવેન વચસા
ત્વા ગિરિશાચ્છાવદામસિ । યથા નઃ સર્વમિજ્જગદયક્ષ્મꣳ
સુમના અસત્ । અધ્યવોચદધિવક્તા પ્રથમો દૈવ્યો ભિષક્ ।

અહીગ્શ્ચ સર્વાઞ્જમ્ભયન્ત્સર્વાશ્ચ યાતુધાન્યઃ । અસૌ
યસ્તામ્રો અરુણ ઉત બભ્રુઃ સુમઙ્ગલઃ । યે ચેમાꣳ
રુદ્રા અભિતો દિક્ષુ શ્રિતાઃ સહસ્રશોઽવૈષાꣳ
હેડ ઈમહે । અસૌ યોઽવસર્પતિ નીલગ્રીવો વિલોહિતઃ ।
ઉતૈનં ગોપા અદૃશન્નદૃશન્નુદહાર્યઃ ।
ઉતૈનં વિશ્વા ભૂતાનિ સ દૃષ્ટો મૃડયાતિ નઃ ।
નમો અસ્તુ નીલગ્રીવાય સહસ્રાક્ષાય મીઢુષે । અથો
યે અસ્ય સત્ત્વાનોઽહં તેભ્યોઽકરન્નમઃ । પ્રમુઞ્ચ
ધન્વનસ્ત્વમુભયોરાર્ત્નિયોર્જ્યામ્ । યાશ્ચ તે હસ્ત
ઇષવઃ પરા તા ભગવો વપ । અવતત્ય ધનુસ્તવꣳ
સહસ્રાક્ષ શતેષુધે । નિશીર્ય શલ્યાનાં મુખા
શિવો નઃ સુમના ભવ । વિજ્યં ધનુઃ કપર્દિનો
વિશલ્યો બાણવાꣳ ઉત । અનેશન્નસ્યેષવ આભુરસ્ય
નિષંગથિઃ । યા તે હેતિર્મીઢુષ્ટમ હસ્તે બભૂવ તે
ધનુઃ । તયાઽસ્માન્, વિશ્વતસ્ત્વમયક્ષ્મયા પરિબ્ભુજ ।
નમસ્તે અસ્ત્વાયુધાયાનાતતાય ધૃષ્ણવે । ઉભાભ્યામુત
તે નમો બાહુભ્યાં તવ ધન્વને । પરિ તે ધન્વનો
હેતિરસ્માન્વૃણક્તુ વિશ્વતઃ । અથો ય ઇષુધિસ્તવારે
અસ્મન્નિધેહિ તમ્ ॥ ૧॥
શમ્ભવે નમઃ । નમસ્તે અસ્તુ ભગવન્વિશ્વેશ્વરાય
મહાદેવાય ત્ર્યમ્બકાય ત્રિપુરાન્તકાય ત્રિકાગ્નિકાલાય
કાલાગ્નિરુદ્રાય નીલકણ્ઠાય મૃત્યુઞ્જયાય સર્વેશ્વરાય
સદાશિવાય શ્રીમન્મહાદેવાય નમઃ ॥
નમો હિરણ્યબાહવે સેનાન્યે દિશાં ચ પતયે નમો
નમો વૃક્ષેભ્યો હરિકેશેભ્યઃ પશૂનાં પતયે નમો
નમઃ સસ્પિઞ્જરાય ત્વિષીમતે પથીનાં પતયે નમો
નમો બભ્લુશાય વિવ્યાધિનેઽન્નાનાં પતયે નમો નમો

હરિકેશાયોપવીતિને પુષ્ટાનાં પતયે નમો નમો ભવસ્ય
હેત્યૈ જગતાં પતયે નમો નમો રુદ્રાયાતતાવિને
ક્ષેત્રાણાં પતયે નમો નમઃ સૂતાયાહન્ત્યાય વનાનાં
પતયે નમો નમો રોહિતાય સ્થપતયે વૃક્ષાણાં પતયે
નમો નમો મન્ત્રિણે વાણિજાય કક્ષાણાં પતયે નમો
નમો ભુવંતયે વારિવસ્કૃતાયૌષધીનાં પતયે નમો
નમ ઉચ્ચૈર્ઘોષાયાક્રન્દયતે પત્તીનાં પતયે નમો
નમઃ કૃત્સ્નવીતાય ધાવતે સત્ત્વનાં પતયે નમઃ ॥ ૨॥
નમઃ સહમાનાય નિવ્યાધિન આવ્યાધિનીનાં પતયે
નમો નમઃ કકુભાય નિષઙ્ગિણે સ્તેનાનાં પતયે
નમો નમો નિષઙ્ગિણ ઇષુધિમતે તસ્કરાણાં પતયે
નમો નમો વઞ્ચતે પરિવઞ્ચતે સ્તાયૂનાં પતયે
નમો નમો નિચેરવે પરિચરાયારણ્યાનાં પતયે નમો
નમઃ સૃકાવિભ્યો જિઘાꣳસદ્ભ્યો મુષ્ણતાં પતયે નમો
નમોઽસિમદ્ભ્યો નક્તઞ્ચરદ્ભ્યઃ પ્રકૃન્તાનાં પતયે
નમો નમ ઉષ્ણીષિણે ગિરિચરાય કુલુઞ્ચાનાં પતયે
નમો નમ ઇષુમદ્ભ્યો ધન્વાવિભ્યશ્ચ વો નમો નમ
આતન્વાનેભ્યઃ પ્રતિદધાનેભ્યશ્ચ વો નમો નમ આયચ્છદ્ભ્યો
વિસૃજદ્ભ્યશ્ચ વો નમો નમોઽસ્યદ્ભ્યો વિધ્યદ્ભ્યશ્ચ
વો નમો નમ આસીનેભ્યઃ શયાનેભ્યશ્ચ વો નમો નમઃ
સ્વપદ્ભ્યો જાગ્રદ્ભ્યશ્ચ વો નમો નમસ્તિષ્ઠદ્ભ્યો
ધાવદ્ભ્યશ્ચ વો નમો નમઃ સભાભ્યઃ સભાપતિભ્યશ્ચ
વો નમો નમો અશ્વેભ્યોઽશ્વપતિભ્યશ્ચ વો નમઃ ॥ ૩॥
નમ આવ્યધિનીભ્યો વિવિધ્યન્તીભ્યશ્ચ વો નમો નમ
ઉગણાભ્યસ્તૃꣳહતીભ્યશ્ચ વો નમો નમો ગૃત્સેભ્યો
ગૃત્સપતિભ્યશ્ચ વો નમો નમો વ્રાતેભ્યો વ્રાતપતિભ્યશ્ચ
વો નમો નમો ગણેભ્યો ગણપતિભ્યશ્ચ વો નમો નમો

વિરૂપેભ્યો વિશ્વરૂપેભ્યશ્ચ વો નમો નમો મહદ્ભ્યઃ,
ક્ષુલ્લકેભ્યશ્ચ વો નમો નમો રથિભ્યોઽરથેભ્યશ્ચ
વો નમો નમો રથેભ્યો રથપતિભ્યશ્ચ વો નમો
નમઃ સેનાભ્યઃ સેનાનિભ્યશ્ચ વો નમો નમઃ,
ક્ષત્તૃભ્યઃ સંગ્રહીતૃભ્યશ્ચ વો નમો નમસ્તક્ષભ્યો
રથકારેભ્યશ્ચ વો નમો નમઃ કુલાલેભ્યઃ કર્મારેભ્યશ્ચ
વો નમો નમઃ પુઞ્જિષ્ટેભ્યો નિષાદેભ્યશ્ચ વો નમો નમ
ઇષુકૃદ્ભ્યો ધન્વકૃદ્ભ્યશ્ચ વો નમો નમો મૃગયુભ્યઃ
શ્વનિભ્યશ્ચ વો નમો નમઃ શ્વભ્યઃ શ્વપતિભ્યશ્ચ વો
નમઃ ॥ ૪॥
નમો ભવાય ચ રુદ્રાય ચ નમઃ શર્વાય ચ
પશુપતયે ચ નમો નીલગ્રીવાય ચ શિતિકણ્ઠાય ચ
નમઃ કપર્દિને ચ વ્યુપ્તકેશાય ચ નમઃ સહસ્રાક્ષાય ચ
શતધન્વને ચ નમો ગિરિશાય ચ શિપિવિષ્ટાય ચ નમો
મીઢુષ્ટમાય ચેષુમતે ચ નમો હ્રસ્વાય ચ વામનાય
ચ નમો બૃહતે ચ વર્ષીયસે ચ નમો વૃદ્ધાય ચ
સંવૃધ્વને ચ નમો અગ્રિયાય ચ પ્રથમાય ચ નમ
આશવે ચાજિરાય ચ નમઃ શીઘ્રિયાય ચ શીભ્યાય ચ
નમ ઊર્મ્યાય ચાવસ્વન્યાય ચ નમઃ સ્રોતસ્યાય ચ
દ્વીપ્યાય ચ ॥ ૫॥
નમો જ્યેષ્ઠાય ચ કનિષ્ઠાય ચ નમઃ પૂર્વજાય
ચાપરજાય ચ નમો મધ્યમાય ચાપગલ્ભાય ચ
નમો જઘન્યાય ચ બુધ્નિયાય ચ નમઃ સોભ્યાય ચ
પ્રતિસર્યાય ચ નમો યામ્યાય ચ ક્ષેમ્યાય ચ નમ
ઉર્વર્યાય ચ ખલ્યાય ચ નમઃ શ્લોક્યાય ચાઽવસાન્યાય
ચ નમો વન્યાય ચ કક્ષ્યાય ચ નમઃ શ્રવાય ચ
પ્રતિશ્રવાય ચ નમ આશુષેણાય ચાશુરથાય ચ
નમઃ શૂરાય ચાવભિન્દતે ચ નમો વર્મિણે ચ વરૂથિને

ચ નમો બિલ્મિને ચ કવચિને ચ નમઃ શ્રુતાય ચ
શ્રુતસેનાય ચ ॥ ૬॥
નમો દુન્દુભ્યાય ચાહનન્યાય ચ નમો ધૃષ્ણવે ચ
પ્રમૃશાય ચ નમો દૂતાય ચ પ્રહિતાય ચ નમો
નિષઙ્ગિણે ચેષુધિમતે ચ નમસ્તીક્ષ્ણેષવે ચાયુધિને
ચ નમઃ સ્વાયુધાય ચ સુધન્વને ચ નમઃ સ્રુત્યાય
ચ પથ્યાય ચ નમઃ કાટ્યાય ચ નીપ્યાય ચ નમઃ
સૂદ્યાય ચ સરસ્યાય ચ નમો નાદ્યાય ચ વૈશન્તાય ચ
નમઃ કૂપ્યાય ચાવટ્યાય ચ નમો વર્ષ્યાય ચાવર્ષ્યાય
ચ નમો મેઘ્યાય ચ વિદ્યુત્યાય ચ નમ ઈધ્રિયાય
ચાતપ્યાય ચ નમો વાત્યાય ચ રેષ્મિયાય ચ નમો
વાસ્તવ્યાય ચ વાસ્તુ પાય ચ ॥ ૭॥
નમઃ સોમાય ચ રુદ્રાય ચ નમસ્તામ્રાય ચારુણાય
ચ નમઃ શઙ્ગાય ચ પશુપતયે ચ નમ ઉગ્રાય ચ
ભીમાય ચ નમો અગ્રેવધાય ચ દૂરેવધાય ચ નમો
હન્ત્રે ચ હનીયસે ચ નમો વૃક્ષેભ્યો હરિકેશેભ્યો
નમસ્તારાય નમશ્શમ્ભવે ચ મયોભવે ચ નમઃ
શઙ્કરાય ચ મયસ્કરાય ચ નમઃ શિવાય ચ
શિવતરાય ચ નમસ્તીર્થ્યાય ચ કૂલ્યાય ચ નમઃ
પાર્યાય ચાવાર્યાય ચ નમઃ પ્રતરણાય ચોત્તરણાય
ચ નમ આતાર્યાય ચાલાદ્યાય ચ નમઃ શષ્પ્યાય ચ
ફેન્યાય ચ નમઃ સિકત્યાય ચ પ્રવાહ્યાય ચ ॥ ૮॥
નમ ઇરિણ્યાય ચ પ્રપથ્યાય ચ નમઃ કિꣳશિલાય
ચ ક્ષયણાય ચ નમઃ કપર્દિને ચ પુલસ્તયે ચ નમો
ગોષ્ઠ્યાય ચ ગૃહ્યાય ચ નમસ્તલ્પ્યાય ચ ગેહ્યાય ચ
નમઃ કાટ્યાય ચ ગહ્વરેષ્ઠાય ચ નમો હ્રદય્યાય ચ
નિવેષ્પ્યાય ચ નમઃ પાꣳસવ્યાય ચ રજસ્યાય ચ

નમઃ શુષ્ક્યાય ચ હરિત્યાય ચ નમો લોપ્યાય ચોલપ્યાય
ચ નમ ઊર્વ્યાય ચ સૂર્મ્યાય ચ નમઃ પર્ણ્યાય ચ
પર્ણશદ્યાય ચ નમોઽપગુરમાણાય ચાભિઘ્નતે ચ
નમ આખ્ખિદતે ચ પ્રખ્ખિદતે ચ નમો વઃ કિરિકેભ્યો
દેવાનાꣳ હૃદયેભ્યો નમો વિક્ષીણકેભ્યો નમો
વિચિન્વત્કેભ્યો નમ આનિર્હતેભ્યો નમ આમીવત્કેભ્યઃ ॥ ૯॥
દ્રાપે અન્ધસસ્પતે દરિદ્રન્નીલલોહિત । એષાં પુરુષાણામેષાં
પશૂનાં મા ભેર્માઽરો મો એષાં કિઞ્ચનામમત્ । યા
તે રુદ્ર શિવા તનૂઃ શિવા વિશ્વાહભેષજી । શિવા
રુદ્રસ્ય ભેષજી તયા નો મૃડ જીવસે । ઇમાꣳ
રુદ્રાય તવસે કપર્દિને ક્ષયદ્વીરાય પ્રભરામહે
મતિમ્ । યથા નઃ શમસદ્દ્વિપદે ચતુષ્પદે વિશ્વં
પુષ્ટં ગ્રામે અસ્મિન્નનાતુરમ્ । મૃડા નો રુદ્રોત નો
મયસ્કૃધિ ક્ષયદ્વીરાય નમસા વિધેમ તે । યચ્છં ચ
યોશ્ચ મનુરાયજે પિતા તદશ્યામ તવ રુદ્ર પ્રણીતૌ ।
મા નો મહાન્તમુત મા નો અર્ભકં મા ન ઉક્ષન્તમુત મા
ન ઉક્ષિતમ્ । મા નોઽવધીઃ પિતરં મોત માતરં પ્રિયા
મા નસ્તનુવો રુદ્ર રીરિષઃ । મા નસ્તોકે તનયે મા ન
આયુષિ મા નો ગોષુ મા નો અશ્વેષુ રીરિષઃ । વીરાન્મા નો
રુદ્ર ભામિતોઽવધીર્હવિષ્મન્તો નમસા વિધેમ તે । આરાત્તે
ગોઘ્ન ઉત પૂરુષઘ્ને ક્ષયદ્વીરાય સુમ્નમસ્મે તે
અસ્તુ । રક્ષા ચ નો અધિ ચ દેવ બ્રૂહ્યધા ચ નઃ શર્મ
યચ્છ દ્વિબર્હાઃ । સ્તુહિ શ્રુતં ગર્તસદં યુવાનં
મૃગન્ન ભીમમુપહત્નુમુગ્રમ્ । મૃડા જરિત્રે રુદ્ર
સ્તવાનો અન્યન્તે અસ્મન્નિવપન્તુ સેનાઃ । પરિણો રુદ્રસ્ય
હેતિર્વૃણક્તુ પરિ ત્વેષસ્ય દુર્મતિ રઘાયોઃ । અવ
સ્થિરા મઘવદ્ભ્યસ્તનુષ્વ મીઢ્વસ્તોકાય તનયાય

મૃડય । મીઢુષ્ટમ શિવતમ શિવો નઃ સુમના ભવ ।
પરમે વૃક્ષ આયુધન્નિધાય કૃત્તિં વસાન આચર
પિનાકં બિભ્રદાગહિ । વિકિરિદ વિલોહિત નમસ્તે અસ્તુ
ભગવઃ । યાસ્તે સહસ્રꣳહેતયોન્યમસ્મન્નિવપન્તુ તાઃ ।
સહસ્રાણિ સહસ્રધા બાહુવોસ્તવ હેતયઃ । તાસામીશાનો
ભગવઃ પરાચીના મુખા કૃધિ ॥ ૧૦ ॥
સહસ્રાણિ સહસ્રશો યે રુદ્રા અધિ ભૂમ્યામ્ ।
તેષાꣳસહસ્રયોજનેઽવધન્વાનિ તન્મસિ ।
અસ્મિન્મહત્યર્ણવેઽન્તરિક્ષે ભવા અધિ । નીલગ્રીવાઃ
શિતિકણ્ઠાઃ શર્વા અધઃ, ક્ષમાચરાઃ । નીલગ્રીવાઃ
શિતિકણ્ઠા દિવꣳરુદ્રા ઉપશ્રિતાઃ । યે વૃક્ષેષુ
સસ્પિઞ્જરા નીલગ્રીવા વિલોહિતાઃ । યે ભૂતાનામધિપતયો
વિશિખાસઃ કપર્દિનઃ । યે અન્નેષુ વિવિધ્યન્તિ પાત્રેષુ
પિબતો જનાન્ । યે પથાં પથિરક્ષય ઐલબૃદા યવ્યુધઃ ।
યે તીર્થાનિ પ્રચરન્તિ સૃકાવન્તો નિષઙ્ગિણઃ । ય
એતાવન્તશ્ચ ભૂયાꣳસશ્ચ દિશો રુદ્રા વિતસ્થિરે ।
તેષાꣳસહસ્રયોજનેઽવધન્વાનિ તન્મસિ । નમો રુદ્રેભ્યો
યે પૃથિવ્યાં યેઽન્તરિક્ષે યે દિવિ યેષામન્નં વાતો
વર્ષમિષવસ્તેભ્યો દશ પ્રાચીર્દશ દક્ષિણા દશ
પ્રતીચીર્દશોદીચીર્દશોર્ધ્વાસ્તેભ્યો નમસ્તે નો મૃડયન્તુ
તે યં દ્વિષ્મો યશ્ચ નો દ્વેષ્ટિ તં વો જમ્ભે દધામિ ॥ ૧૧ ॥
ત્ર્યમ્બકં યજામહે સુગન્ધિં પુષ્ટિવર્ધનમ્ ।
ઉર્વારુકમિવ બન્ધનાન્મૃત્યોર્મુક્ષીય માઽમૃતાત્ ॥
યો રુદ્રો અગ્નૌ યો અપ્સુ ય ઓષધીષુ યો રુદ્રો વિશ્વા
ભુવના વિવેશ તસ્મૈ રુદ્રાય નમો અસ્તુ ॥
તમુ ષ્ટુહિ યઃ સ્વિષુઃ સુધન્વા યો વિશ્વસ્ય
ક્ષયતિ ભેષજસ્ય ।

યક્ષ્વામહે સૌમનસાય રુદ્રં નમોભિર્દેવમસુરં દુવસ્ય ॥

અયં મે હસ્તો ભગવાનયં મે ભગવત્તરઃ ।
અયં મે વિશ્વભેષજોઽયꣳ શિવાભિમર્શનઃ ॥

યે તે સહસ્રમયુતં પાશા મૃત્યો મર્ત્યાય હન્તવે ।
તાન્ યજ્ઞસ્ય માયયા સર્વાનવ યજામહે ।
મૃત્યવે સ્વાહા મૃત્યવે સ્વાહા ॥

ૐ નમો ભગવતે રુદ્રાય વિષ્ણવે મૃત્યુર્મે પાહિ ।
પ્રાણાનાં ગ્રન્થિરસિ રુદ્રો મા વિશાન્તકઃ । તેનાન્નેનાપ્યાયસ્વ ॥

નમો રુદ્રાય વિષ્ણવે મૃત્યુર્મે પાહિ ।
સદાશિવોમ્ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

See chamakam in a separate file.

Encoded and proofread by Rajagopal Iyer, Rekha Venkatesh

*Rudraprashna*
pdf was typeset on July 17, 2022

Please send corrections to *sanskrit@cheerful.com*